# ambAstotram by Swami Vivekanand

# અમ્બાસ્તોત્રં સ્વામી વિવેકાનન્દરચિતમ્

## Document Information

Text title : ambAstotram 1

File name : ambaastotram.itx

Category : devii, pArvatI, stotra, vivekAnanda, devI

Location : doc_devii

Author : Swami Vivekananda

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : by Swami Vivekananda

Latest update : Dec. 27, 1997

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 14, 2020

*sanskritdocuments.org*

# અમ્બાસ્તોત્રં સ્વામી વિવેકાનન્દરચિતમ્

કા ત્વં શુભકરે સુખદુઃખહસ્તે
    આઘૂર્ણિતં ભવજલં પ્રબલોર્મિભઙ્ગૈઃ ।
શાંતિં વિધાતુમિહ કિં બહુધા વિભગ્નામ્
    મતઃ પ્રયત્નપરમાસિ સદૈવ વિશ્વે ॥ ૧॥

સમ્પાદયત્યવિરતં ત્વવિરામવૃતા
    યા વૈ સ્થિતા કૃતફલં ત્વકૃતસ્ય નેત્રી ।
સા મે ભવત્વનિદિનં વરદા ભવાની
    જાનામ્યહં ધ્રુવમિદં ધૃતકર્મપાશા ॥ ૨॥

કો વા ધર્મઃ કિમકૃતં ક્વઃ કપાલલેખઃ
    કિંવાદૃષ્ટં ફલમિહાસ્તિ હિ યાં વિના ભોઃ ।
ઇચ્છાપાશૈર્નિયમિતા નિયમાઃ સ્વતંત્રૈઃ
    યસ્યા નેત્રી ભવતિ સા શરણં મમાદ્યા ॥ ૩॥

સન્તાનયન્તિ જલધિં જનિમૃત્યુજાલમ્
    સમ્ભાવયન્ત્યવિકૃતં વિકૃતં વિભગ્નમ્ ।
યસ્યા વિભૂતય ઇહામિતશક્તિપાલાઃ
    નાશ્રિત્ય તાં વદ કુત શરણં વ્રજામઃ ॥ ૪॥

મિત્રે રિપૌ ત્વવિષમં તવ પદ્મનેત્રમ્
    સ્વસ્થે દુઃસ્થે ત્વવિતથં તવ હસ્તપાતઃ ।
મૃત્યુચ્છાયા તવ દયા ત્વમૃતઞ્ચ માતઃ
    મા માં મુઞ્ચન્તુ પરમે શુભદૃષ્ટયસ્તે ॥ ૫॥

ક્વામ્બા સર્વા ક્વ ગણનં મમ હીનબુદ્ધેઃ
    ધત્તું દોર્ભ્યામિવ મતિર્જગદેકધાત્રીમ્ ।
શ્રીસઞ્ચિન્ત્યં સુચરણમભયપતિષ્ઠમ્
    સેવાસારૈરભિનુતં શરણં પ્રપદ્યે ॥ ૬॥

યા મામા જન્મ વિનયત્યતિદુઃખમાર્ગૈઃ
    આસંસિદ્ધેઃ સ્વકલિતૈર્લ્લલિતૈર્વિલાસૈઃ ।
યા મે બુદ્ધિં સુવિદધે સતતં ધરણ્યમ્
    સામ્બા સર્વા મમ ગતિઃ સફલે ફલે વા ॥ ૭॥

ઇતિ અમ્બાસ્તોત્રં સમ્પૂર્ણમ્ ।

Encoded and proofread by Sunder Hattangadi (sunderh at hotmail.com)

*ambAstotram by Swami Vivekanand*

pdf was typeset on March 14, 2020

Please send corrections to *sanskrit@cheerful.com*